स्तद्वाप्नुयुः” इति स्मृतिः ‘संवत्सरद्वयं तन्तु गान्धारीगर्भमाहितम् । अप्रजा धारयामास ततस्तां दुःखमाविशत्” भा० आ० प० ।

**अप्रजस्** पुंस्त्री न प्रजा सन्ततिः यस्य असिच् समा० । प्रजाशून्ये । “अतीतायामप्रजसि तद्धनं भर्त्तृगामि च” स्मृतिः । “अस्वं त्वाप्रजसं कृणोमि” अथ० ७,३५,३ ।

**अप्रजाता** स्त्री न प्रजाता कदापि न प्रसूता । १ अधृतगर्भायां बन्ध्यायां स्त्रियाम् “दासीनामप्रजातानां शुभानां स्वर्णवर्चसाम् । शतमस्मै प्रदास्यामि” भा० उ० प० १५ अ० ।

**अप्रणीत** त्रि० न प्रणीतः वेदविधिना संस्कृतः । १ वैधसंस्कारशून्ये अनलादौ २ अकृते च ।

**अप्रतर्क्य** त्रि० न प्रतर्क्यः तर्कयितुमशक्यः । लिङ्गाद्यभावेन अनुमानेन ज्ञातुमशक्ये । “अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः” मनुः ।

**अप्रता** त्रि० प्र+ताय–क्विप् नास्ति प्रताः यस्मात् ५ त० । १ अतिविस्तीर्णे “न सोमो अप्रता पपे” ऋ० ८,३२,१६, ‘अप्रता विस्तीर्णधनेनेति” भा० धातोरातोलोपात् रूपम्

**अप्रति** त्रि० नास्ति प्रति प्रतिरूपः प्रतिद्वन्द्वी वा यस्य । १ अत्युत्कृष्टे ‘सो अप्रतीनि मनवे पुरूणीन्द्रः” ऋ० २,१९ ४, “अप्रतीनि उत्कृष्टानि” भा० २ प्रतिद्वन्द्विरहिते “यः एकः इदप्रतिर्मन्यमानः ऋ० ५,३२,३ । “अप्रतिः प्रतिद्वन्द्विरहितः” भा० । ३ अप्रतिरूपे अनुपमे च

**अप्रतिकर** त्रि० प्रति वैपरीत्ये कृ–कर्त्तरि अच् न प्रतिकरः । १ विपरीतकारिणि विश्वस्ते, जटा० प्रति+कृ–भावे अप् प्रतिकरः प्रतिक्षेपः अभावे न० त० । २ प्रतिक्षेपाभावे पु० न० ब० ३ प्रतिक्षेपशून्ये त्रि० ।

**अप्रति(ती)कार** पु० प्रति+कृ–घञ् वा दीर्घः अभावे न० त० १ प्रतीकाराभावे । न० ब० । २ प्रतीकारहीने ३ प्रतिकर्त्तुमशक्ये च त्रि० । अभावे अव्ययी० । ४ प्रतीकाराभावे अव्य० ।

**अप्रतिकर्म्मन्** त्रि० नास्ति प्रतिकर्म प्रतीकारो यस्य । १ प्रतिकर्त्तुमशक्ये । नास्ति प्रति प्रतिरूपं तुल्यं यस्य तादृशं कर्म यस्य । २ अतुल्यकर्मके त्रि० स्त्रियां डाप् वा ।

**अप्रतिक्रिया** स्त्री प्रतिक्रिया प्रतीकारः अभावे न० त० । १ प्रतीकाराभावे । न० ब० । २ प्रतीकारशून्ये ३ प्रतिकर्त्तुमशक्ये च त्रि० ।

**अप्रतिग्राह्य** त्रि० न प्रतिग्रहीतुं योग्यं स्मृतौ निषेधात् । प्रतिग्रहीतुमयोग्ये स्मृतौ निषिद्धप्रतिग्रहतया उल्लिखिते हिरण्यादौ द्रव्ये, शूद्रादिधनादौ च प्रतिग्रहस्यादृष्टार्थत्यक्तद्रव्याङ्गीकारः । तत्र द्रव्यविशेषे, अपादानविशेषे, कालादिविशेषे च प्रायश्चित्तोत्कीर्त्तनेन पापजनकत्वात् क्वचित् वस्तुकृता क्वचित् कालादिनिमित्तकृता चाप्रतिग्राह्यता “प्रतिगृह्याप्रतिग्राह्यं भुक्त्वा चान्नं विगर्हितम्” मनुः तानि च प्रायश्चित्तविवेके दर्शितानि तत्रादौ प्रतिग्रहे अपादाननियमः “यथा “राजतो धनमन्विच्छेत् संसीदन् स्नातकः क्षुधा । याज्यान्तेवासिनो वापि नत्वन्यत इति स्थितिः” मनुः । राजशब्दोऽत्र न्यायवर्त्तिक्षत्रियनृपतिपरः ‘न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः” इति “यो राज्ञः प्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्त्तिनः स पर्य्यायेण यातीमान्नरकानेकविंशतिमिति” मनुनान्यराजतस्तन्निषेधात् देवलेन विशिष्टादेव राज्ञः प्रतिग्रहविधानाच्च “धर्मज्ञस्य कृतज्ञस्य रक्षार्थं शासतोऽशुचीन् मेध्यमेव धनं प्राहुस्तीक्ष्णस्यापि महीपतेः” इति “द्विजातिभ्यो धनं लिप्सेत् प्रशस्तेभ्यो द्विजोत्तमः । अपि वा क्षत्रियात् वैश्यात् न तु शूद्रात् कदाचनेति” व्यासः निन्दितप्रतिग्रहश्च अपात्रीकरणम् “निन्दितेभ्योधनादानं बाणिज्यं शूद्रसेवनम् । अपात्रीकरणं ज्ञेयमिति” मनूक्तेः चाण्डालादिप्रतिग्रहस्तु पातित्यहेतुः “चण्डालान्त्यस्त्रियोगत्वा भुक्त्वा च प्रतिगृह्य च । पतत्यज्ञानतोविप्रोज्ञानात् साम्यं तु गच्छति” मनूक्तेः तेन प्रायश्चित्ताधिक्यम् रजकादीनुक्त्वा ‘भुक्त्वा चैषां स्त्रियोगत्वा पीत्वापः प्रतिगृह्य च । कृच्छ्रमब्दं चरेज् ज्ञानादिति” मनूक्तेः “पतितानां गृहं गत्वा भुक्त्वा च प्रतिगृह्य च । मासोपवासं कुर्वीत चान्द्रायणमथापि वा” वृह० ‘शौकरिकव्याधनिषादरजकवरुड़चर्मकारा न भोज्यान्ना अप्रतिग्राह्यास्तदन्नाशनप्रतिग्रहयोश्चान्द्रायणं चरेत्” सुम० “रजकश्चर्मकारश्च नटोवरुड़ एव च कैवर्त्तमेदभिल्लाश्च सप्तैते ह्यन्त्यजाः स्मृताः एतेषाञ्च स्त्रियोगत्वा भुक्त्वा च प्रतिगृह्य च । पतत्यज्ञानतोविप्रोज्ञानात् साम्यं तु गच्छति” यमः अत्रापवादः ‘शय्यां गृहं कुशान् गन्धान् पत्रं पुष्पं फलं दधि । धानामत्स्यान् पयोमांसं शाकञ्चैव न निर्णुदेदिति” मनुः न निर्णुदेत् न त्यजेत् “अभोज्यान्नानामपि पुष्पफलशाकतृणकाष्ठधान्यानि क्षेत्रस्थान्यम्बु तड़ागस्थं, गोष्ठस्थं च पय आदाय न दोष” इति सुमन्तुः तेषाञ्च उपढौकितानामेवादाने न दोष इति प्रा० वि० । “अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्मणः । अन्यत्र कुलटाषण्ढपतितेभ्यो द्विष-